**Shri Vishnu Sahasranama Stothram - Gujarati**

# શ્રીવિષ્ણુસહસ્રનામસ્તોત્રમ્

ૐ અથ સકલસૌભાગ્યદાયક શ્રીવિષ્ણુસહસ્રનામસ્તોત્રમ્ .

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ .
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે .. ૧..

યસ્ય દ્વિરદવક્ત્રાધ્યાઃ પારિષધ્યાઃ પરઃ શતમ્ .
વિઘ્નં નિઘ્નન્તિ સતતં વિષ્વક્સેનં તમાશ્રયે .. ૨..

વ્યાસં વસિષ્ઠનપ્તારં શક્તેઃ પૌત્રમકલ્મષમ્ .
પરાશરાત્મજં વન્દે શુકતાતં તપોનિધિમ્ .. ૩..

વ્યાસાય વિષ્ણુરૂપાય વ્યાસરૂપાય વિષ્ણવે .
નમો વૈ બ્રહ્મનિધયે વાસિષ્ઠાય નમો નમઃ .. ૪..

અવિકારાય શુદ્ધાય નિત્યાય પરમાત્મને .
સદૈકરૂપરૂપાય વિષ્ણવે સર્વજિષ્ણવે .. ૫..

યસ્ય સ્મરણમાત્રેણ જન્મસંસારબન્ધનાત્ .
વિમુચ્યતે નમસ્તસ્મૈ વિષ્ણવે પ્રભવિષ્ણવે .. ૬..

ૐ નમો વિષ્ણવે પ્રભવિષ્ણવે .
શ્રીવૈશમ્પાયન ઉવાચ ---
શ્રુત્વા ધર્માનશેષેણ પાવનાનિ ચ સર્વશઃ .
યુધિષ્ઠિરઃ શાન્તનવં પુનરેવાભ્યભાષત .. ૭..

યુધિષ્ઠિર ઉવાચ ---

કિમેકં દૈવતં લોકે કિં વાપ્યેકં પરાયણમ્ .
સ્તુવન્તઃ કં કમર્ચન્તઃ પ્રાપ્નુયુર્માનવાઃ શુભમ્ .. ૮..

કો ધર્મઃ સર્વધર્માણાં ભવતઃ પરમો મતઃ .
કિં જપન્મુચ્યતે જન્તુર્જન્મસંસારબન્ધનાત્ .. ૯..

ભીષ્મ ઉવાચ ---

જગત્પ્રભું દેવદેવમનન્તં પુરુષોત્તમમ્ .
સ્તુવન્ નામસહસ્રેણ પુરુષઃ સતતોત્થિતઃ .. ૧૦..

તમેવ ચાર્ચયન્નિત્યં  ભક્ત્યા પુરુષમવ્યયમ્ .
ધ્યાયન્ સ્તુવન્ નમસ્યંશ્ચ યજમાનસ્તમેવ ચ .. ૧૧..

અનાદિનિધનં વિષ્ણું સર્વલોકમહેશ્વરમ્ .
લોકાધ્યક્ષં સ્તુવન્નિત્યં સર્વદુઃખાતિગો ભવેત્ .. ૧૨..

બ્રહ્મણ્યં સર્વધર્મજ્ઞં લોકાનાં કીર્તિવર્ધનમ્ .
લોકનાથં મહદ્ભૂતં સર્વભૂતભવોદ્ભવમ્ .. ૧૩..

એષ મે સર્વધર્માણાં ધર્મોઽધિકતમો મતઃ .
યદ્ભક્ત્યા પુણ્ડરીકાક્ષં સ્તવૈરર્ચેન્નરઃ સદા .. ૧૪..

પરમં યો મહત્તેજઃ પરમં યો મહત્તપઃ .
પરમં યો મહદ્બ્રહ્મ પરમં યઃ પરાયણમ્ .. ૧૫..

પવિત્રાણાં પવિત્રં યો મઙ્ગલાનાં ચ મઙ્ગલમ્ .
દૈવતં દૈવતાનાં ચ ભૂતાનાં યોઽવ્યયઃ પિતા .. ૧૬..

યતઃ સર્વાણિ ભૂતાનિ ભવન્ત્યાદિયુગાગમે .
યસ્મિંશ્ચ પ્રલયં યાન્તિ પુનરેવ યુગક્ષયે .. ૧૭..

તસ્ય લોકપ્રધાનસ્ય જગન્નાથસ્ય ભૂપતે .
વિષ્ણોર્નામસહસ્રં મે શૃણુ પાપભયાપહમ્ .. ૧૮..

યાનિ નામાનિ ગૌણાનિ વિખ્યાતાનિ મહાત્મનઃ .
ઋષિભિઃ પરિગીતાનિ તાનિ વક્ષ્યામિ ભૂતયે .. ૧૯..

ઋષિર્નામ્નાં સહસ્રસ્ય વેદવ્યાસો મહામુનિઃ ..

છન્દોઽનુષ્ટુપ્ તથા દેવો ભગવાન્ દેવકીસુતઃ .. ૨૦..

અમૃતાંશૂદ્ભવો બીજં શક્તિર્દેવકિનન્દનઃ .
ત્રિસામા હૃદયં તસ્ય શાન્ત્યર્થે વિનિયોજ્યતે .. ૨૧..

વિષ્ણું જિષ્ણું મહાવિષ્ણું પ્રભવિષ્ણું મહેશ્વરમ્ ..

અનેકરૂપ દૈત્યાન્તં નમામિ પુરુષોત્તમં .. ૨૨ ..

**પૂર્વન્યાસઃ** .

શ્રીવેદવ્યાસ ઉવાચ ---

ૐ અસ્ય શ્રીવિષ્ણોર્દિવ્યસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય .
શ્રી વેદવ્યાસો ભગવાન્ ઋષિઃ .
અનુષ્ટુપ્ છન્દઃ .
શ્રીમહાવિષ્ણુઃ પરમાત્મા શ્રીમન્નારાયણો દેવતા .
અમૃતાંશૂદ્ભવો ભાનુરિતિ બીજમ્ .
દેવકીનન્દનઃ સ્રષ્ટેતિ શક્તિઃ .
ઉદ્ભવઃ ક્ષોભણો દેવ ઇતિ પરમો મન્ત્રઃ .

શઙ્ખભૃન્નન્દકી ચક્રીતિ કીલકમ્ .
શાર્ઙ્ગધન્વા ગદાધર ઇત્યસ્ત્રમ્ .
રથાઙ્ગપાણિરક્ષોભ્ય ઇતિ નેત્રમ્ .
ત્રિસામા સામગઃ સામેતિ કવચમ્ .
આનન્દં પરબ્રહ્મેતિ યોનિઃ .
ઋતુઃ સુદર્શનઃ કાલ ઇતિ દિગ્બન્ધઃ ..

શ્રીવિશ્વરૂપ ઇતિ ધ્યાનમ્ .
શ્રીમહાવિષ્ણુપ્રીત્યર્થે સહસ્રનામસ્તોત્રપાઠે વિનિયોગઃ ..

**અથ ન્યાસઃ .**

ૐ શિરસિ વેદવ્યાસઋષયે નમઃ .
મુખે અનુષ્ટુપ્છન્દસે નમઃ .
હૃદિ શ્રીકૃષ્ણપરમાત્મદેવતાયૈ નમઃ .
ગુહ્યે અમૃતાંશૂદ્ભવો ભાનુરિતિ બીજાય નમઃ .
પાદયોર્દેવકીનન્દનઃ સ્રષ્ટેતિ શક્તયે નમઃ .
સર્વાઙ્ગે શઙ્ખભૃન્નન્દકી ચક્રીતિ કીલકાય નમઃ .
કરસમ્પૂટે મમ શ્રીકૃષ્ણપ્રીત્યર્થે જપે વિનિયોગાય નમઃ ..

ઇતિ ઋષયાદિન્યાસઃ ..

અથ કરન્યાસઃ .

ૐ વિશ્વં વિષ્ણુર્વષટ્કાર ઇત્યઙ્ગુષ્ઠાભ્યાં નમઃ .
અમૃતાંશૂદ્ભવો ભાનુરિતિ તર્જનીભ્યાં નમઃ .
બ્રહ્મણ્યો બ્રહ્મકૃદ્બ્રહ્મેતિ મધ્યમાભ્યાં નમઃ .
સુવર્ણબિન્દુરક્ષોભ્ય ઇત્યનામિકાભ્યાં નમઃ .
નિમિષોઽનિમિષઃ સ્રગ્વીતિ કનિષ્ઠિકાભ્યાં નમઃ .
રથાઙ્ગપાણિરક્ષોભ્ય ઇતિ કરતલકરપૃષ્ઠાભ્યાં નમઃ .
ઇતિ કરન્યાસઃ .

અથ ષડઙ્ગન્યાસઃ .
ૐ વિશ્વં વિષ્ણુર્વષટ્કાર ઇતિ હૃદયાય નમઃ .
અમૃતાંશૂદ્ભવો ભાનુરિતિ શિરસે સ્વાહા .
બ્રહ્મણ્યો બ્રહ્મકૃદ્બ્રહ્મેતિ શિખાયૈ વષટ્ .
સુવર્ણબિન્દુરક્ષોભ્ય ઇતિ કવચાય હુમ્ .
નિમિષોઽનિમિષઃ સ્રગ્વીતિ નેત્રત્રયાય વૌષટ્ .
રથાઙ્ગપાણિરક્ષોભ્ય ઇત્યસ્ત્રાય ફટ્ .
ઇતિ ષડઙ્ગન્યાસઃ ..

શ્રીકૃષ્ણપ્રીત્યર્થે વિષ્ણોર્દિવ્યસહસ્રનામજપમહં
કરિષ્યે ઇતિ સઙ્કલ્પઃ .
અથ ધ્યાનમ્ .
ક્ષીરોદન્વત્પ્રદેશે શુચિમણિવિલસત્સૈકતેમૌક્તિકાનાં
માલાક્લૃપ્તાસનસ્થઃ સ્ફટિકમણિનિભૈર્મૌક્તિકૈર્મણ્ડિતાઙ્ગઃ .
શુભ્રૈરભ્રૈરદભ્રૈરુપરિવિરચિતૈર્મુક્તપીયૂષ વર્ષૈઃ
આનન્દી નઃ પુનીયાદરિનલિનગદા શઙ્ખપાણિર્મુકુન્દઃ .. ૧..

ભૂઃ પાદૌ યસ્ય નાભિર્વિયદસુરનિલશ્ચન્દ્ર સૂર્યૌ ચ નેત્રે
કર્ણાવાશાઃ શિરો દ્યૌર્મુખમપિ દહનો યસ્ય વાસ્તેયમબ્ધિઃ .
અન્તઃસ્થં યસ્ય વિશ્વં સુરનરખગગોભોગિગન્ધર્વદૈત્યૈઃ
ચિત્રં રંરમ્યતે તં ત્રિભુવન વપુષં વિષ્ણુમીશં નમામિ .. ૨..

ૐ શાન્તાકારં ભુજગશયનં પદ્મનાભં સુરેશં
વિશ્વાધારં ગગનસદૃશં મેઘવર્ણં શુભાઙ્ગમ્ .
લક્ષ્મીકાન્તં કમલનયનં યોગિભિર્ધ્યાનગમ્યં var યોગિહૃદ્ધ્યાનગમ્યં
વન્દે વિષ્ણું ભવભયહરં સર્વલોકૈકનાથમ્ .. ૩..

મેઘશ્યામં પીતકૌશેયવાસં
શ્રીવત્સાઙ્કં કૌસ્તુભોદ્ભાસિતાઙ્ગમ્ .

પુણ્યોપેતં પુણ્ડરીકાયતાક્ષં
વિષ્ણું વન્દે સર્વલોકૈકનાથમ્ .. ૪..

નમઃ સમસ્તભૂતાનામાદિભૂતાય ભૂભૃતે .
અનેકરૂપરૂપાય વિષ્ણવે પ્રભવિષ્ણવે .. ૫..

સશઙ્ખચક્રં સકિરીટકુણ્ડલં
સપીતવસ્ત્રં સરસીરુહેક્ષણમ્ .
સહારવક્ષઃસ્થલકૌસ્તુભશ્રિયં var સ્થલશોભિકૌસ્તુભં
નમામિ વિષ્ણું શિરસા ચતુર્ભુજમ્ .. ૬..

છાયાયાં પારિજાતસ્ય હેમસિંહાસનોપરિ
આસીનમમ્બુદશ્યામમાયતાક્ષમલંકૃતમ્ .
ચન્દ્રાનનં ચતુર્બાહું શ્રીવત્સાઙ્કિત વક્ષસં
રુક્મિણી સત્યભામાભ્યાં સહિતં કૃષ્ણમાશ્રયે .. ૭..

**સ્તોત્રમ્** .

હરિઃ ૐ .

વિશ્વં વિષ્ણુર્વષટ્કારો ભૂતભવ્યભવત્પ્રભુઃ .
ભૂતકૃદ્ભૂતભૃદ્ભાવો ભૂતાત્મા ભૂતભાવનઃ .. ૧..

પૂતાત્મા પરમાત્મા ચ મુક્તાનાં પરમા ગતિઃ .
અવ્યયઃ પુરુષઃ સાક્ષી ક્ષેત્રજ્ઞોઽક્ષર એવ ચ .. ૨..

યોગો યોગવિદાં નેતા પ્રધાનપુરુષેશ્વરઃ .
નારસિંહવપુઃ શ્રીમાન્ કેશવઃ પુરુષોત્તમઃ .. ૩..

સર્વઃ શર્વઃ શિવઃ સ્થાણુર્ભૂતાદિર્નિધિરવ્યયઃ .
સમ્ભવો ભાવનો ભર્તા પ્રભવઃ પ્રભુરીશ્વરઃ .. ૪..

સ્વયમ્ભૂઃ શમ્ભુરાદિત્યઃ પુષ્કરાક્ષો મહાસ્વનઃ .
અનાદિનિધનો ધાતા વિધાતા ધાતુરુત્તમઃ .. ૫..

અપ્રમેયો હૃષીકેશઃ પદ્મનાભોઽમરપ્રભુઃ .
વિશ્વકર્મા મનુસ્ત્વષ્ટા સ્થવિષ્ઠઃ સ્થવિરો ધ્રુવઃ .. ૬..

અગ્રાહ્યઃ શાશ્વતઃ કૃષ્ણો લોહિતાક્ષઃ પ્રતર્દનઃ .
પ્રભૂતસ્ત્રિકકુબ્ધામ પવિત્રં મઙ્ગલં પરમ્ .. ૭..

ઈશાનઃ પ્રાણદઃ પ્રાણો જ્યેષ્ઠઃ શ્રેષ્ઠઃ પ્રજાપતિઃ .
હિરણ્યગર્ભો ભૂગર્ભો માધવો મધુસૂદનઃ .. ૮..

ઈશ્વરો વિક્રમી ધન્વી મેધાવી વિક્રમઃ ક્રમઃ .
અનુત્તમો દુરાધર્ષઃ કૃતજ્ઞઃ કૃતિરાત્મવાન્ .. ૯..

સુરેશઃ શરણં શર્મ વિશ્વરેતાઃ પ્રજાભવઃ .
અહઃ સંવત્સરો વ્યાલઃ પ્રત્યયઃ સર્વદર્શનઃ .. ૧૦..

અજઃ સર્વેશ્વરઃ સિદ્ધઃ સિદ્ધિઃ સર્વાદિરચ્યુતઃ .
વૃષાકપિરમેયાત્મા સર્વયોગવિનિઃસૃતઃ .. ૧૧..

વસુર્વસુમનાઃ સત્યઃ સમાત્માઽસમ્મિતઃ સમઃ .
અમોઘઃ પુણ્ડરીકાક્ષો વૃષકર્મા વૃષાકૃતિઃ .. ૧૨..

રુદ્રો બહુશિરા બભ્રુર્વિશ્વયોનિઃ શુચિશ્રવાઃ .
અમૃતઃ શાશ્વતસ્થાણુર્વરારોહો મહાતપાઃ .. ૧૩..

સર્વગઃ સર્વવિદ્ભાનુર્વિષ્વક્સેનો જનાર્દનઃ .

વેદો વેદવિદવ્યઙ્ગો વેદાઙ્ગો વેદવિત્ કવિઃ .. ૧૪..

લોકાધ્યક્ષઃ સુરાધ્યક્ષો ધર્માધ્યક્ષઃ કૃતાકૃતઃ .
ચતુરાત્મા ચતુર્વ્યૂહશ્ચતુર્દંષ્ટ્રશ્ચતુર્ભુજઃ .. ૧૫..

ભ્રાજિષ્ણુર્ભોજનં ભોક્તા સહિષ્ણુર્જગદાદિજઃ .
અનઘો વિજયો જેતા વિશ્વયોનિઃ પુનર્વસુઃ .. ૧૬..

ઉપેન્દ્રો વામનઃ પ્રાંશુરમોઘઃ શુચિરૂર્જિતઃ .
અતીન્દ્રઃ સઙ્ગ્રહઃ સર્ગો ધૃતાત્મા નિયમો યમઃ .. ૧૭..

વેદ્યો વૈદ્યઃ સદાયોગી વીરહા માધવો મધુઃ .
અતીન્દ્રિયો મહામાયો મહોત્સાહો મહાબલઃ .. ૧૮..

મહાબુદ્ધિર્મહાવીર્યો મહાશક્તિર્મહાદ્યુતિઃ .
અનિર્દેશ્યવપુઃ શ્રીમાનમેયાત્મા મહાદ્રિધૃક્ .. ૧૯..

મહેષ્વાસો મહીભર્તા શ્રીનિવાસઃ સતાં ગતિઃ .
અનિરુદ્ધઃ સુરાનન્દો ગોવિન્દો ગોવિદાં પતિઃ .. ૨૦..

મરીચિર્દમનો હંસઃ સુપર્ણો ભુજગોત્તમઃ .
હિરણ્યનાભઃ સુતપાઃ પદ્મનાભઃ પ્રજાપતિઃ .. ૨૧..

અમૃત્યુઃ સર્વદૃક્ સિંહઃ સન્ધાતા સન્ધિમાન્ સ્થિરઃ .
અજો દુર્મર્ષણઃ શાસ્તા વિશ્રુતાત્મા સુરારિહા .. ૨૨..

ગુરુર્ગુરુતમો ધામ સત્યઃ સત્યપરાક્રમઃ .
નિમિષોઽનિમિષઃ સ્રગ્વી વાચસ્પતિરુદારધીઃ .. ૨૩..

અગ્રણીર્ગ્રામણીઃ શ્રીમાન્ ન્યાયો નેતા સમીરણઃ .
સહસ્રમૂર્ધા વિશ્વાત્મા સહસ્રાક્ષઃ સહસ્રપાત્ .. ૨૪..

આવર્તનો નિવૃત્તાત્મા સંવૃતઃ સમ્પ્રમર્દનઃ .
અહઃ સંવર્તકો વહ્નિરનિલો ધરણીધરઃ .. ૨૫..

સુપ્રસાદઃ પ્રસન્નાત્મા વિશ્વધૃગ્વિશ્વભુગ્વિભુઃ .
સત્કર્તા સત્કૃતઃ સાધુર્જહ્નુર્નારાયણો નરઃ .. ૨૬..

અસઙ્ખ્યેયોઽપ્રમેયાત્મા વિશિષ્ટઃ શિષ્ટકૃચ્છુચિઃ .
સિદ્ધાર્થઃ સિદ્ધસઙ્કલ્પઃ સિદ્ધિદઃ સિદ્ધિસાધનઃ .. ૨૭..

વૃષાહી વૃષભો વિષ્ણુર્વૃષપર્વા વૃષોદરઃ .
વર્ધનો વર્ધમાનશ્ચ વિવિક્તઃ શ્રુતિસાગરઃ .. ૨૮..

સુભુજો દુર્ધરો વાગ્મી મહેન્દ્રો વસુદો વસુઃ .
નૈકરૂપો બૃહદ્રૂપઃ શિપિવિષ્ટઃ પ્રકાશનઃ .. ૨૯..

ઓજસ્તેજોદ્યુતિધરઃ પ્રકાશાત્મા પ્રતાપનઃ .
ઋદ્ધઃ સ્પષ્ટાક્ષરો મન્ત્રશ્ચન્દ્રાંશુર્ભાસ્કરદ્યુતિઃ .. ૩૦..

અમૃતાંશૂદ્ભવો ભાનુઃ શશબિન્દુઃ સુરેશ્વરઃ .
ઔષધં જગતઃ સેતુઃ સત્યધર્મપરાક્રમઃ .. ૩૧..

ભૂતભવ્યભવન્નાથઃ પવનઃ પાવનોઽનલઃ .
કામહા કામકૃત્કાન્તઃ કામઃ કામપ્રદઃ પ્રભુઃ .. ૩૨..

યુગાદિકૃદ્યુગાવર્તો નૈકમાયો મહાશનઃ .
અદૃશ્યો વ્યક્તરૂપશ્ચ સહસ્રજિદનન્તજિત્ .. ૩૩..

ઇષ્ટોઽવિશિષ્ટઃ શિષ્ટેષ્ટઃ શિખણ્ડી નહુષો વૃષઃ .
ક્રોધહા ક્રોધકૃત્કર્તા વિશ્વબાહુર્મહીધરઃ .. ૩૪..

અચ્યુતઃ પ્રથિતઃ પ્રાણઃ પ્રાણદો વાસવાનુજઃ .
અપાંનિધિરધિષ્ઠાનમપ્રમત્તઃ પ્રતિષ્ઠિતઃ .. ૩૫..

સ્કન્દઃ સ્કન્દધરો ધુર્યો વરદો વાયુવાહનઃ .
વાસુદેવો બૃહદ્ભાનુરાદિદેવઃ પુરન્દરઃ .. ૩૬..

અશોકસ્તારણસ્તારઃ શૂરઃ શૌરિર્જનેશ્વરઃ .
અનુકૂલઃ શતાવર્તઃ પદ્મી પદ્મનિભેક્ષણઃ .. ૩૭..

પદ્મનાભોઽરવિન્દાક્ષઃ પદ્મગર્ભઃ શરીરભૃત્ .
મહર્દ્ધિરૃદ્ધો વૃદ્ધાત્મા મહાક્ષો ગરુડધ્વજઃ .. ૩૮..

અતુલઃ શરભો ભીમઃ સમયજ્ઞો હવિર્હરિઃ .
સર્વલક્ષણલક્ષણ્યો લક્ષ્મીવાન્ સમિતિઞ્જયઃ .. ૩૯..

વિક્ષરો રોહિતો માર્ગો હેતુર્દામોદરઃ સહઃ .
મહીધરો મહાભાગો વેગવાનમિતાશનઃ .. ૪૦..

ઉદ્ભવઃ ક્ષોભણો દેવઃ શ્રીગર્ભઃ પરમેશ્વરઃ .
કરણં કારણં કર્તા વિકર્તા ગહનો ગુહઃ .. ૪૧..

વ્યવસાયો વ્યવસ્થાનઃ સંસ્થાનઃ સ્થાનદો ધ્રુવઃ .
પરર્દ્ધિઃ પરમસ્પષ્ટસ્તુષ્ટઃ પુષ્ટઃ શુભેક્ષણઃ .. ૪૨..

રામો વિરામો વિરજો માર્ગો નેયો નયોઽનયઃ . or વિરામો વિરતો

વીરઃ શક્તિમતાં શ્રેષ્ઠો ધર્મો ધર્મવિદુત્તમઃ .. ૪૩..

વૈકુણ્ઠઃ પુરુષઃ પ્રાણઃ પ્રાણદઃ પ્રણવઃ પૃથુઃ .
હિરણ્યગર્ભઃ શત્રુઘ્નો વ્યાપ્તો વાયુરધોક્ષજઃ .. ૪૪..

ઋતુઃ સુદર્શનઃ કાલઃ પરમેષ્ઠી પરિગ્રહઃ .
ઉગ્રઃ સંવત્સરો દક્ષો વિશ્રામો વિશ્વદક્ષિણઃ .. ૪૫..

વિસ્તારઃ સ્થાવરસ્થાણુઃ પ્રમાણં બીજમવ્યયમ્ .
અર્થોઽનર્થો મહાકોશો મહાભોગો મહાધનઃ .. ૪૬..

અનિર્વિણ્ણઃ સ્થવિષ્ઠોઽભૂર્ધર્મયૂપો મહામખઃ .
નક્ષત્રનેમિર્નક્ષત્રી ક્ષમઃ ક્ષામઃ સમીહનઃ .. ૪૭..

યજ્ઞ ઇજ્યો મહેજ્યશ્ચ ક્રતુઃ સત્રં સતાં ગતિઃ .
સર્વદર્શી વિમુક્તાત્મા સર્વજ્ઞો જ્ઞાનમુત્તમમ્ .. ૪૮..

સુવ્રતઃ સુમુખઃ સૂક્ષ્મઃ સુઘોષઃ સુખદઃ સુહૃત્ .
મનોહરો જિતક્રોધો વીરબાહુર્વિદારણઃ .. ૪૯..

સ્વાપનઃ સ્વવશો વ્યાપી નૈકાત્મા નૈકકર્મકૃત્ .
વત્સરો વત્સલો વત્સી રત્નગર્ભો ધનેશ્વરઃ .. ૫૦..

ધર્મગુબ્ધર્મકૃદ્ધર્મી સદસત્ક્ષરમક્ષરમ્ .
અવિજ્ઞાતા સહસ્રાંશુર્વિધાતા કૃતલક્ષણઃ .. ૫૧..

ગભસ્તિનેમિઃ સત્ત્વસ્થઃ સિંહો ભૂતમહેશ્વરઃ .
આદિદેવો મહાદેવો દેવેશો દેવભૃદ્ગુરુઃ .. ૫૨..

ઉત્તરો ગોપતિર્ગોપ્તા જ્ઞાનગમ્યઃ પુરાતનઃ .
શરીરભૂતભૃદ્ભોક્તા કપીન્દ્રો ભૂરિદક્ષિણઃ .. ૫૩..

સોમપોઽમૃતપઃ સોમઃ પુરુજિત્પુરુસત્તમઃ .
વિનયો જયઃ સત્યસન્ધો દાશાર્હઃ સાત્વતામ્પતિઃ .. ૫૪.. વિનિયોજ્યઃ

જીવો વિનયિતા સાક્ષી મુકુન્દોઽમિતવિક્રમઃ .
અમ્ભોનિધિરનન્તાત્મા મહોદધિશયોઽન્તકઃ .. ૫૫..

અજો મહાર્હઃ સ્વાભાવ્યો જિતામિત્રઃ પ્રમોદનઃ .
આનન્દો નન્દનો નન્દઃ સત્યધર્મા ત્રિવિક્રમઃ .. ૫૬..

મહર્ષિઃ કપિલાચાર્યઃ કૃતજ્ઞો મેદિનીપતિઃ .
ત્રિપદસ્ત્રિદશાધ્યક્ષો મહાશૃઙ્ગઃ કૃતાન્તકૃત્ .. ૫૭..

મહાવરાહો ગોવિન્દઃ સુષેણઃ કનકાઙ્ગદી .
ગુહ્યો ગભીરો ગહનો ગુપ્તશ્ચક્રગદાધરઃ .. ૫૮..

વેધાઃ સ્વાઙ્ગોઽજિતઃ કૃષ્ણો દૃઢઃ સઙ્કર્ષણોઽચ્યુતઃ .
વરુણો વારુણો વૃક્ષઃ પુષ્કરાક્ષો મહામનાઃ .. ૫૯..

ભગવાન્ ભગહાઽઽનન્દી વનમાલી હલાયુધઃ .
આદિત્યો જ્યોતિરાદિત્યઃ સહિષ્ણુર્ગતિસત્તમઃ .. ૬૦..

સુધન્વા ખણ્ડપરશુર્દારુણો દ્રવિણપ્રદઃ .
દિવસ્પૃક્ સર્વદૃગ્વ્યાસો વાચસ્પતિરયોનિજઃ .. ૬૧.. var દિવિસ્પૃક્
ત્રિસામા સામગઃ સામ નિર્વાણં ભેષજં ભિષક્ .
સંન્યાસકૃચ્છમઃ શાન્તો નિષ્ઠા શાન્તિઃ પરાયણમ્ .. ૬૨..

શુભાઙ્ગઃ શાન્તિદઃ સ્રષ્ટા કુમુદઃ કુવલેશયઃ .
ગોહિતો ગોપતિર્ગોપ્તા વૃષભાક્ષો વૃષપ્રિયઃ .. ૬૩..

અનિવર્તી નિવૃત્તાત્મા સઙ્ક્ષેપ્તા ક્ષેમકૃચ્છિવઃ .
શ્રીવત્સવક્ષાઃ શ્રીવાસઃ શ્રીપતિઃ શ્રીમતાંવરઃ .. ૬૪..

શ્રીદઃ શ્રીશઃ શ્રીનિવાસઃ શ્રીનિધિઃ શ્રીવિભાવનઃ .
શ્રીધરઃ શ્રીકરઃ શ્રેયઃ શ્રીમાઁલ્લોકત્રયાશ્રયઃ .. ૬૫..

સ્વક્ષઃ સ્વઙ્ગઃ શતાનન્દો નન્દિર્જ્યોતિર્ગણેશ્વરઃ .
વિજિતાત્માઽવિધેયાત્મા સત્કીર્તિશ્છિન્નસંશયઃ .. ૬૬..

ઉદીર્ણઃ સર્વતશ્ચક્ષુરનીશઃ શાશ્વતસ્થિરઃ .
ભૂશયો ભૂષણો ભૂતિર્વિશોકઃ શોકનાશનઃ .. ૬૭..

અર્ચિષ્માનર્ચિતઃ કુમ્ભો વિશુદ્ધાત્મા વિશોધનઃ .
અનિરુદ્ધોઽપ્રતિરથઃ પ્રદ્યુમ્નોઽમિતવિક્રમઃ .. ૬૮..

કાલનેમિનિહા વીરઃ શૌરિઃ શૂરજનેશ્વરઃ .
ત્રિલોકાત્મા ત્રિલોકેશઃ કેશવઃ કેશિહા હરિઃ .. ૬૯..

કામદેવઃ કામપાલઃ કામી કાન્તઃ કૃતાગમઃ .
અનિર્દેશ્યવપુર્વિષ્ણુર્વીરોઽનન્તો ધનઞ્જયઃ .. ૭૦..

બ્રહ્મણ્યો બ્રહ્મકૃદ્ બ્રહ્મા બ્રહ્મ બ્રહ્મવિવર્ધનઃ .
બ્રહ્મવિદ્ બ્રાહ્મણો બ્રહ્મી બ્રહ્મજ્ઞો બ્રાહ્મણપ્રિયઃ .. ૭૧..

મહાક્રમો મહાકર્મા મહાતેજા મહોરગઃ .
મહાક્રતુર્મહાયજ્વા મહાયજ્ઞો મહાહવિઃ .. ૭૨..

સ્તવ્યઃ સ્તવપ્રિયઃ સ્તોત્રં સ્તુતિઃ સ્તોતા રણપ્રિયઃ .
પૂર્ણઃ પૂરયિતા પુણ્યઃ પુણ્યકીર્તિરનામયઃ .. ૭૩..

મનોજવસ્તીર્થકરો વસુરેતા વસુપ્રદઃ .
વસુપ્રદો વાસુદેવો વસુર્વસુમના હવિઃ .. ૭૪..

સદ્ગતિઃ સત્કૃતિઃ સત્તા સદ્ભૂતિઃ સત્પરાયણઃ .
શૂરસેનો યદુશ્રેષ્ઠઃ સન્નિવાસઃ સુયામુનઃ .. ૭૫..

ભૂતાવાસો વાસુદેવઃ સર્વાસુનિલયોઽનલઃ .
દર્પહા દર્પદો દૃપ્તો દુર્ધરોઽથાપરાજિતઃ .. ૭૬..

વિશ્વમૂર્તિર્મહામૂર્તિર્દીપ્તમૂર્તિરમૂર્તિમાન્ .
અનેકમૂર્તિરવ્યક્તઃ શતમૂર્તિઃ શતાનનઃ .. ૭૭..

એકો નૈકઃ સવઃ કઃ કિં યત્ તત્પદમનુત્તમમ્ .
લોકબન્ધુર્લોકનાથો માધવો ભક્તવત્સલઃ .. ૭૮..

સુવર્ણવર્ણો હેમાઙ્ગો વરાઙ્ગશ્ચન્દનાઙ્ગદી .
વીરહા વિષમઃ શૂન્યો ઘૃતાશીરચલશ્ચલઃ .. ૭૯..

અમાની માનદો માન્યો લોકસ્વામી ત્રિલોકધૃક્ .
સુમેધા મેધજો ધન્યઃ સત્યમેધા ધરાધરઃ .. ૮૦..

તેજોવૃષો દ્યુતિધરઃ સર્વશસ્ત્રભૃતાં વરઃ .
પ્રગ્રહો નિગ્રહો વ્યગ્રો નૈકશૃઙ્ગો ગદાગ્રજઃ .. ૮૧..

ચતુર્મૂર્તિશ્ચતુર્બાહુશ્ચતુર્વ્યૂહશ્ચતુર્ગતિઃ .

ચતુરાત્મા ચતુર્ભાવશ્ચતુર્વેદવિદેકપાત્ .. ૮૨..

સમાવર્તોઽનિવૃત્તાત્મા દુર્જયો દુરતિક્રમઃ .
દુર્લભો દુર્ગમો દુર્ગો દુરાવાસો દુરારિહા .. ૮૩..

શુભાઙ્ગો લોકસારઙ્ગઃ સુતન્તુસ્તન્તુવર્ધનઃ .
ઇન્દ્રકર્મા મહાકર્મા કૃતકર્મા કૃતાગમઃ .. ૮૪..

ઉદ્ભવઃ સુન્દરઃ સુન્દો રત્નનાભઃ સુલોચનઃ .
અર્કો વાજસનઃ શૃઙ્ગી જયન્તઃ સર્વવિજ્જયી .. ૮૫..

સુવર્ણબિન્દુરક્ષોભ્યઃ સર્વવાગીશ્વરેશ્વરઃ .
મહાહ્રદો મહાગર્તો મહાભૂતો મહાનિધિઃ .. ૮૬..

કુમુદઃ કુન્દરઃ કુન્દઃ પર્જન્યઃ પાવનોઽનિલઃ .
અમૃતાશોઽમૃતવપુઃ સર્વજ્ઞઃ સર્વતોમુખઃ .. ૮૭..

સુલભઃ સુવ્રતઃ સિદ્ધઃ શત્રુજિચ્છત્રુતાપનઃ .
ન્યગ્રોધોઽદુમ્બરોઽશ્વત્થશ્ચાણૂરાન્ધ્રનિષૂદનઃ .. ૮૮..

સહસ્રાર્ચિઃ સપ્તજિહ્વઃ સપ્તૈધાઃ સપ્તવાહનઃ .
અમૂર્તિરનઘોઽચિન્ત્યો ભયકૃદ્ભયનાશનઃ .. ૮૯..

અણુર્બૃહત્કૃશઃ સ્થૂલો ગુણભૃન્નિર્ગુણો મહાન્ .
અધૃતઃ સ્વધૃતઃ સ્વાસ્યઃ પ્રાગ્વંશો વંશવર્ધનઃ .. ૯૦..

ભારભૃત્ કથિતો યોગી યોગીશઃ સર્વકામદઃ .
આશ્રમઃ શ્રમણઃ ક્ષામઃ સુપર્ણો વાયુવાહનઃ .. ૯૧..

ધનુર્ધરો ધનુર્વેદો દણ્ડો દમયિતા દમઃ .
અપરાજિતઃ સર્વસહો નિયન્તાઽનિયમોઽયમઃ .. ૯૨..

સત્ત્વવાન્ સાત્ત્વિકઃ સત્યઃ સત્યધર્મપરાયણઃ .
અભિપ્રાયઃ પ્રિયાર્હોઽર્હઃ પ્રિયકૃત્ પ્રીતિવર્ધનઃ .. ૯૩..

વિહાયસગતિર્જ્યોતિઃ સુરુચિર્હુતભુગ્વિભુઃ .
રવિર્વિરોચનઃ સૂર્યઃ સવિતા રવિલોચનઃ .. ૯૪..

અનન્તો હુતભુગ્ભોક્તા સુખદો નૈકજોઽગ્રજઃ .
અનિર્વિણ્ણઃ સદામર્ષી લોકાધિષ્ઠાનમદ્ભુતઃ .. ૯૫..

સનાત્સનાતનતમઃ કપિલઃ કપિરવ્યયઃ .
સ્વસ્તિદઃ સ્વસ્તિકૃત્સ્વસ્તિ સ્વસ્તિભુક્સ્વસ્તિદક્ષિણઃ .. ૯૬..

અરૌદ્રઃ કુણ્ડલી ચક્રી વિક્રમ્યૂર્જિતશાસનઃ .
શબ્દાતિગઃ શબ્દસહઃ શિશિરઃ શર્વરીકરઃ .. ૯૭..

અક્રૂરઃ પેશલો દક્ષો દક્ષિણઃ ક્ષમિણાંવરઃ .
વિદ્વત્તમો વીતભયઃ પુણ્યશ્રવણકીર્તનઃ .. ૯૮..

ઉત્તારણો દુષ્કૃતિહા પુણ્યો દુઃસ્વપ્નનાશનઃ .
વીરહા રક્ષણઃ સન્તો જીવનઃ પર્યવસ્થિતઃ .. ૯૯..

અનન્તરૂપોઽનન્તશ્રીર્જિતમન્યુર્ભયાપહઃ .
ચતુરશ્રો ગભીરાત્મા વિદિશો વ્યાદિશો દિશઃ .. ૧૦૦..

અનાદિર્ભૂર્ભુવો લક્ષ્મીઃ સુવીરો રુચિરાઙ્ગદઃ .
જનનો જનજન્માદિર્ભીમો ભીમપરાક્રમઃ .. ૧૦૧..

આધારનિલયોઽધાતા પુષ્પહાસઃ પ્રજાગરઃ .
ઊર્ધ્વગઃ સત્પથાચારઃ પ્રાણદઃ પ્રણવઃ પણઃ .. ૧૦૨..

પ્રમાણં પ્રાણનિલયઃ પ્રાણભૃત્પ્રાણજીવનઃ .
તત્ત્વં તત્ત્વવિદેકાત્મા જન્મમૃત્યુજરાતિગઃ .. ૧૦૩..

ભૂર્ભુવઃસ્વસ્તરુસ્તારઃ સવિતા પ્રપિતામહઃ .
યજ્ઞો યજ્ઞપતિર્યજ્વા યજ્ઞાઙ્ગો યજ્ઞવાહનઃ .. ૧૦૪..

યજ્ઞભૃદ્ યજ્ઞકૃદ્ યજ્ઞી યજ્ઞભુગ્ યજ્ઞસાધનઃ .
યજ્ઞાન્તકૃદ્ યજ્ઞગુહ્યમન્નમન્નાદ એવ ચ .. ૧૦૫..

આત્મયોનિઃ સ્વયઞ્જાતો વૈખાનઃ સામગાયનઃ .
દેવકીનન્દનઃ સ્રષ્ટા ક્ષિતીશઃ પાપનાશનઃ .. ૧૦૬..

શઙ્ખભૃન્નન્દકી ચક્રી શાર્ઙ્ગધન્વા ગદાધરઃ .
રથાઙ્ગપાણિરક્ષોભ્યઃ સર્વપ્રહરણાયુધઃ .. ૧૦૭..

સર્વપ્રહરણાયુધ ૐ નમ ઇતિ .
વનમાલી ગદી શાર્ઙ્ગી શઙ્ખી ચક્રી ચ નન્દકી .
શ્રીમાન્ નારાયણો વિષ્ણુર્વાસુદેવોઽભિરક્ષતુ .. ૧૦૮..

શ્રી વાસુદેવોઽભિરક્ષતુ ૐ નમ ઇતિ .

ઉત્તરન્યાસઃ .

ભીષ્મ ઉવાચ ---

ઇતીદં કીર્તનીયસ્ય કેશવસ્ય મહાત્મનઃ .
નામ્નાં સહસ્રં દિવ્યાનામશેષેણ પ્રકીર્તિતમ્ .. ૧..

ય ઇદં શૃણુયાન્નિત્યં યશ્ચાપિ પરિકીર્તયેત્ .
નાશુભં પ્રાપ્નુયાત્કિઞ્ચિત્સોઽમુત્રેહ ચ માનવઃ .. ૨..

વેદાન્તગો બ્રાહ્મણઃ સ્યાત્ક્ષત્રિયો વિજયી ભવેત્ .
વૈશ્યો ધનસમૃદ્ધઃ સ્યાચ્છૂદ્રઃ સુખમવાપ્નુયાત્ .. ૩..

ધર્માર્થી પ્રાપ્નુયાદ્ધર્મમર્થાર્થી ચાર્થમાપ્નુયાત્ .
કામાનવાપ્નુયાત્કામી પ્રજાર્થી પ્રાપ્નુયાત્પ્રજામ્ .. ૪..

ભક્તિમાન્ યઃ સદોત્થાય શુચિસ્તદ્ગતમાનસઃ .
સહસ્રં વાસુદેવસ્ય નામ્નામેતત્પ્રકીર્તયેત્ .. ૫..

યશઃ પ્રાપ્નોતિ વિપુલં જ્ઞાતિપ્રાધાન્યમેવ ચ .
અચલાં શ્રિયમાપ્નોતિ શ્રેયઃ પ્રાપ્નોત્યનુત્તમમ્ .. ૬..

ન ભયં ક્વચિદાપ્નોતિ વીર્યં તેજશ્ચ વિન્દતિ .
ભવત્યરોગો દ્યુતિમાન્બલરૂપગુણાન્વિતઃ .. ૭..

રોગાર્તો મુચ્યતે રોગાદ્બદ્ધો મુચ્યેત બન્ધનાત્ .
ભયાન્મુચ્યેત ભીતસ્તુ મુચ્યેતાપન્ન આપદઃ .. ૮..

દુર્ગાણ્યતિતરત્યાશુ પુરુષઃ પુરુષોત્તમમ્ .
સ્તુવન્નામસહસ્રેણ નિત્યં ભક્તિસમન્વિતઃ .. ૯..

વાસુદેવાશ્રયો મર્ત્યો વાસુદેવપરાયણઃ .
સર્વપાપવિશુદ્ધાત્મા યાતિ બ્રહ્મ સનાતનમ્ .. ૧૦..

ન વાસુદેવભક્તાનામશુભં વિદ્યતે ક્વચિત્ .
જન્મમૃત્યુજરાવ્યાધિભયં નૈવોપજાયતે .. ૧૧..

ઇમં સ્તવમધીયાનઃ શ્રદ્ધાભક્તિસમન્વિતઃ .
યુજ્યેતાત્મસુખક્ષાન્તિશ્રીધૃતિસ્મૃતિકીર્તિભિઃ .. ૧૨..

ન ક્રોધો ન ચ માત્સર્યં ન લોભો નાશુભા મતિઃ .
ભવન્તિ કૃત પુણ્યાનાં ભક્તાનાં પુરુષોત્તમે .. ૧૩..

દ્યૌઃ સચન્દ્રાર્કનક્ષત્રા ખં દિશો ભૂર્મહોદધિઃ .
વાસુદેવસ્ય વીર્યેણ વિધૃતાનિ મહાત્મનઃ .. ૧૪..

સસુરાસુરગન્ધર્વં સયક્ષોરગરાક્ષસમ્ .
જગદ્વશે વર્તતેદં કૃષ્ણસ્ય સચરાચરમ્ .. ૧૫..

ઇન્દ્રિયાણિ મનો બુદ્ધિઃ સત્ત્વં તેજો બલં ધૃતિઃ .
વાસુદેવાત્મકાન્યાહુઃ ક્ષેત્રં ક્ષેત્રજ્ઞ એવ ચ .. ૧૬..

સર્વાગમાનામાચારઃ પ્રથમં પરિકલ્પ્યતે . var?? કલ્પતે
આચારપ્રભવો ધર્મો ધર્મસ્ય પ્રભુરચ્યુતઃ .. ૧૭..

ઋષયઃ પિતરો દેવા મહાભૂતાનિ ધાતવઃ .
જઙ્ગમાજઙ્ગમં ચેદં જગન્નારાયણોદ્ભવમ્ .. ૧૮..

યોગો જ્ઞાનં તથા સાઙ્ખ્યં વિદ્યાઃ શિલ્પાદિ કર્મ ચ .
વેદાઃ શાસ્ત્રાણિ વિજ્ઞાનમેતત્સર્વં જનાર્દનાત્ .. ૧૯..

એકો વિષ્ણુર્મહદ્ભૂતં પૃથગ્ભૂતાન્યનેકશઃ .
ત્રીંલ્લોકાન્વ્યાપ્ય ભૂતાત્મા ભુઙ્ક્તે વિશ્વભુગવ્યયઃ .. ૨૦..

ઇમં સ્તવં ભગવતો વિષ્ણોર્વ્યાસેન કીર્તિતમ્ .

પઠેધ્ઇચ્છેત્પુરુષઃ શ્રેયઃ પ્રાપ્તું સુખાનિ ચ .. ૨૧..

વિશ્વેશ્વરમજં દેવં જગતઃ પ્રભુમવ્યયમ્ .
ભજન્તિ યે પુષ્કરાક્ષં ન તે યાન્તિ પરાભવમ્ .. ૨૨..

ન તે યાન્તિ પરાભવમ્ ૐ નમ ઇતિ .
અર્જુન ઉવાચ ---
પદ્મપત્રવિશાલાક્ષ પદ્મનાભ સુરોત્તમ .
ભક્તાનામનુરક્તાનાં ત્રાતા ભવ જનાર્દન .. ૨૩..

શ્રીભગવાનુવાચ ---
યો માં નામસહસ્રેણ સ્તોતુમિચ્છતિ પાણ્ડવ .
સોઽહમેકેન શ્લોકેન સ્તુત એવ ન સંશયઃ .. ૨૪..

સ્તુત એવ ન સંશય ૐ નમ ઇતિ .
વ્યાસ ઉવાચ ---
વાસનાદ્વાસુદેવસ્ય વાસિતં ભુવનત્રયમ્ .
સર્વભૂતનિવાસોઽસિ વાસુદેવ નમોઽસ્તુ તે .. ૨૫..

શ્રી વાસુદેવ નમોઽસ્તુત ૐ નમ ઇતિ .
પાર્વત્યુવાચ ---
કેનોપાયેન લઘુના વિષ્ણોર્નામસહસ્રકમ્ .
પઠ્યતે પણ્ડિતૈર્નિત્યં શ્રોતુમિચ્છામ્યહં પ્રભો .. ૨૬..

ઈશ્વર ઉવાચ ---
શ્રીરામ રામ રામેતિ રમે રામે મનોરમે .
સહસ્રનામ તત્તુલ્યં રામ નામ વરાનને .. ૨૭..

શ્રીરામનામ વરાનન ૐ નમ ઇતિ .

ब्रह्मोवाच ---

નમોઽસ્ત્વનન્તાય સહસ્રમૂર્તયે
સહસ્રપાદાક્ષિશિરોરુબાહવે .
સહસ્રનામ્ને પુરુષાય શાશ્વતે
સહસ્રકોટિયુગધારિણે નમઃ .. ૨૮..

સહસ્રકોટિયુગધારિણે ૐ નમ ઇતિ .

ૐ તત્સદિતિ શ્રીમહાભારતે શતસાહસ્ર્યાં સંહિતાયાં વૈયાસિક્યામાનુશાસનિકે પર્વણિ ભીષ્મયુધિષ્ઠિરસંવાદે શ્રીવિષ્ણોર્દિવ્યસહસ્રનામસ્તોત્રમ્ ..

સઞ્જય ઉવાચ ---

યત્ર યોગેશ્વરઃ કૃષ્ણો યત્ર પાર્થો ધનુર્ધરઃ .
તત્ર શ્રીર્વિજયો ભૂતિર્ધ્રુવા નીતિર્મતિર્મમ .. ૨૯..

શ્રીભગવાનુવાચ ---

અનન્યાશ્ચિન્તયન્તો માં યે જનાઃ પર્યુપાસતે .
તેષાં નિત્યાભિયુક્તાનાં યોગક્ષેમં વહામ્યહમ્ .. ૩૦..

પરિત્રાણાય સાધૂનાં વિનાશાય ચ દુષ્કૃતામ્ .
ધર્મસંસ્થાપનાર્થાય સમ્ભવામિ યુગે યુગે .. ૩૧..

આર્તાઃ વિષણ્ણાઃ શિથિલાશ્ચ ભીતાઃ ઘોરેષુ ચ વ્યાધિષુ વર્તમાનાઃ .
સઙ્કીર્ત્ય નારાયણશબ્દમાત્રં વિમુક્તદુઃખાઃ સુખિનો ભવન્તિ .. ૩૨.. var ભવન્તુ

કાયેન વાચા મનસેન્દ્રિયૈર્વા બુદ્ધ્યાત્મના વા પ્રકૃતેઃ સ્વભાવાત્ . var પ્રકૃતિસ્વભાવાત્ .
કરોમિ યદ્યત્ સકલં પરસ્મૈ નારાયણાયેતિ સમર્પયામિ .. ૩૩..

इति श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं सम्पूर्णम् .
ॐ तत् सत् .

મહાભારતે અનુશાસનપર્વણિ

Additional Concluding Shlokas

ૐ આપદામપહર્તારં દાતારં સર્વસમ્પદામ્ .
લોકાભિરામં શ્રીરામં ભૂયો ભૂયો નમામ્યહમ્ ..

આર્તાનામાર્તિહન્તારં ભીતાનાં ભીતિનાશનમ્ .
દ્વિષતાં કાલદણ્ડં તં રામચન્દ્રં નમામ્યહમ્ ..

નમઃ કોદણ્ડહસ્તાય સન્ધીકૃતશરાય ચ .
ખણ્ડિતાખિલદૈત્યાય રામાયઽઽપન્નિવારિણે ..

રામાય રામભદ્રાય રામચન્દ્રાય વેધસે .
રઘુનાથાય નાથાય સીતાયાઃ પતયે નમઃ ..

અગ્રતઃ પૃષ્ઠતશ્ચૈવ પાર્શ્વતશ્ચ મહાબલૌ .
આકર્ણપૂર્ણધન્વાનૌ રક્ષેતાં રામલક્ષ્મણૌ ..

સન્નદ્ધઃ કવચી ખડ્ગી ચાપબાણધરો યુવા .
ગચ્છન્ મમાગ્રતો નિત્યં રામઃ પાતુ સલક્ષ્મણઃ ..

અચ્યુતાનન્તગોવિન્દ નામોચ્ચારણભેષજાત્ .
નશ્યન્તિ સકલા રોગાસ્સત્યં સત્યં વદામ્યહમ્ ..

સત્યં સત્યં પુનસ્સત્યમુદ્ધૃત્ય ભુજમુચ્યતે .

વેદાચ્છાસ્ત્રં પરં નાસ્તિ ન દેવં કેશવાત્પરમ્ ..

શરીરે જર્ઝરીભૂતે વ્યાધિગ્રસ્તે કળેવરે .
ઔષધં જાહ્નવીતોયં વૈદ્યો નારાયણો હરિઃ ..

આલોડ્ય સર્વશાસ્ત્રાણિ વિચાર્ય ચ પુનઃ પુનઃ .
ઇદમેકં સુનિષ્પન્નં ધ્યેયો નારાયણો હરિઃ ..

યદક્ષરપદભ્રષ્ટં માત્રાહીનં તુ યદ્ભવેત્ .
તત્સર્વં ક્ષમ્યતાં દેવ નારાયણ નમોઽસ્તુ તે ..

વિસર્ગબિન્દુમાત્રાણિ પદપાદાક્ષરાણિ ચ .
ન્યૂનાનિ ચાતિરિક્તાનિ ક્ષમસ્વ પુરુષોત્તમ ..

---

Alternate Concluding Shlokas

નમઃ કમલનાભાય નમસ્તે જલશાયિને .
નમસ્તે કેશવાનન્ત વાસુદેવ નમોઽસ્તુતે ..

નમો બ્રહ્મણ્યદેવાય ગોબ્રાહ્મણહિતાય ચ .
જગદ્ધિતાય કૃષ્ણાય ગોવિન્દાય નમો નમઃ ..

આકાશાત્પતિતં તોયં યથા ગચ્છતિ સાગરમ્ .
સર્વદેવનમસ્કારઃ કેશવં પ્રતિ ગચ્છતિ ..

એષ નિષ્કણ્ટકઃ પન્થા યત્ર સમ્પૂજ્યતે હરિઃ .
કુપથં તં વિજાનીયાદ્ ગોવિન્દરહિતાગમમ્ ..

સર્વવેદેષુ યત્પુણ્યં સર્વતીર્થેષુ યત્ફલમ્ .
તત્ફલં સમવાપ્નોતિ સ્તુત્વા દેવં જનાર્દનમ્ ..

યો નરઃ પઠતે નિત્યં ત્રિકાલં કેશવાલયે .
દ્વિકાલમેકકાલં વા ક્રૂરં સર્વં વ્યપોહતિ ..

દહ્યન્તે રિપવસ્તસ્ય સૌમ્યાઃ સર્વે સદા ગ્રહાઃ .
વિલીયન્તે ચ પાપાનિ સ્તવે હ્યસ્મિન્ પ્રકીર્તિતે ..

યેને ધ્યાતઃ શ્રુતો યેન યેનાયં પઠ્યતે સ્તવઃ .
દત્તાનિ સર્વદાનાનિ સુરાઃ સર્વે સમર્ચિતાઃ ..

ઇહ લોકે પરે વાપિ ન ભયં વિદ્યતે ક્વચિત્ .
નામ્નાં સહસ્રં યોઽધીતે દ્વાદશ્યાં મમ સન્નિધૌ ..

શનૈર્દહન્તિ પાપાનિ કલ્પકોટીશતાનિ ચ .
અશ્વત્થસન્નિધૌ પાર્થ ધ્યાત્વા મનસિ કેશવમ્ ..

પઠેન્નામસહસ્રં તુ ગવાં કોટિફલં લભેત્ .
શિવાલયે પઠેનિત્યં તુલસીવનસંસ્થિતઃ ..

નરો મુક્તિમવાપ્નોતિ ચક્રપાણેર્વચો યથા .
બ્રહ્મહત્યાદિકં ઘોરં સર્વપાપં વિનશ્યતિ ..

વિલયં યાન્તિ પાપાનિ ચાન્યપાપસ્ય કા કથા .
સર્વપાપવિનિર્મુક્તો વિષ્ણુલોકં સ ગચ્છતિ ..

.. હરિઃ ૐ તત્સત્ ..